# अथ प्रार्थनापञ्चकम्

शरीरचेष्टा मम ते प्रणामः स्तुतिस्तु वागिन्द्रियवृत्तिरस्तु ।
सर्वा मनोवृत्तिरनुस्मृतिस्ते सर्वं तवाराधनमेव भूयात् ॥१॥

गुरोः सुसंगोऽस्तु दया च सेवा जन्मान्तरे तस्य गृहे जनिश्च ।
श्रीमध्वशास्त्रश्रवणं मम स्यादनंतकालेन सुपुण्यहेतोः ॥२॥

दारेषु पुत्रेषु सुहृत्समित्रजनेषु शिष्येषु गुरौ प्रियेषु ।
प्रीतिर्मम स्यात्सततं गरीयसी प्रियेतरे प्रीतिविपर्ययः स्यात् ॥

कोपो गुरूणां मयि नैव भूयाद्दया गुरूणां मम सर्वदा स्यात् ।
निर्मायसेवा सततं मयि स्यान्निरूपमा पूर्णदया मयि स्यात् ॥

पिता च माता च सुहृत्सुबन्धु-
र्भ्राता सखा मे परदेवता च ।
भक्तिं प्रदेहि भगवंस्त्वयि निश्चलां मे
नित्यं त्वदीयपदपद्मनिषेवणं च ॥५॥

॥ इति यादवार्यविरचितं प्रार्थनापञ्चकम् ॥